हैमन्तिकौ च द्वौ मासौ निवसन्ति दिवाकरे। अंशो भगश्च द्वावेतौ कश्यपश्च क्रतुश्च तौ। भुजङ्गश्च महापद्मः सर्पः कर्कोटकस्तथा MatsyaP. 126. 17; BrahmāṇḍP. i. 23. 16; BhaviP. i.. 52. 44 (96B. 14); अंशकाश्यपताक्ष्यास्तु महापद्मस्तथोर्वशी। चित्रसेनस्तथा विद्युन्मार्गशीर्षेऽधिकारिणः (i. e. they reside in the sun in मार्गशीर्ष) ViṣṇuP. ii. 10. 13; **4 A** share of inheritance, heritage, patrimony स सुन्वत इन्द्रः सूर्नमा देवो रिणङ्मर्त्याय स्तवान्। आ यद् रयिं गुहदवद्यमस्मै भरदंशं नैतशो दशस्यन् ṚV. ii. 19. 5 (Sāy. यथा पिता अंशं भागं पुत्राय भरति तद्वत्); आ नस्तुजं रयिं भरांशं न प्रतिजानते ṚV. iii. 45. 4; अंशं हारी P. v. 2. 69 (see also Kāśi-Vṛ); P. v. 1. 56; CāndraVyā. iv. 1. 66; तेषामप्राप्तव्यवहाराणामंशान् सोपचयान् सुनिगुप्तान् निदध्युरा व्यवहारप्रापणात् BaudhDS. ii. 2. 37; दत्तोंऽशः पाण्डुपुत्राणाम् MahāBhā. v. 127. 40; i. 195. 17; v. 93. 53; एष…पाण्डुभ्यः प्रोच्यमानोऽपि पित्र्यमंशं न दत्तवान् MahāBhā. ix. 60. 20; सकृदंशो निपतति MahāBhā. iii. 278. 25; ManuSm. 9. 47; SmṛtiCan. i. 218. 4; SūktiRa. 163. 88; प्रसङ्गादंशदानयोरपि सकृताभिधानम् ManvaMu. 372. 19 (*on* 9. 47); (विननाश) मानाद्…अप्रयच्छन् दुर्योधनो राज्यादंशं च ArthŚā. i. 38. 3 (1. 6); तद्दाशैरेव दातव्यं…स्वतोंऽशतः ManuSm. 8. 408; अनंशौ क्लीबपतितौ ManuSm. 9. 201; विभक्ताश्च दायानुरूपमंशम् ViṣṇuSm. 6. 36; द्व्यंशौ वैश्यापुत्रः ViṣṇuSm. 18. 4; समानंशानादद्युः ViṣṇuSm. 18. 36; मातर्प्यंशं समं हरेत् YājñaSm. 2. 123; सर्वेषां पितृपुत्राणां सम एवांशोऽवगम्यत इति SmṛtiCan. iv. 608. 10; गणद्रव्यादावप्यंशो देय इति प्रयोगदर्शनात् SmṛtiCan. iv. 623. 17; अंशो दायादानां विभक्तोऽर्थः ManvaVi. 1140. 1 (*on* 9. 47); अनेकपितृकाणां…पैतामहधने विभज्यमाने यः पितॄणामंशः स एव न पुनः प्रत्येकमंशकल्पना DīpKa. 55. 9 (*on* 2. 120); एषु भूम्यादिषु…पुत्रेच्छया विभागोंऽशोऽपि सम एव DīpKa. 55. 11 (*on* 2. 121); तेनात्मांशो नैनदौहित्राय दत्तः EI. iii. 56. 35; उत्कोचपारितोषकभाटसुभाषितपरार्थचौर्यांशाः। तत्क्षणमेव ग्राह्याः षडन्यकाले न लभ्यन्ते Subhāṣi. 2349; **4 B i** part, portion, fragment, fraction, branch etc. (of a material thing) सौमिकात् प्रक्रमात् तृतीयोंऽशः प्रक्रमः स्यात् BaudhŚS. ii. 415. 4; पतनीयानां (प्रायश्चित्तं) तृतीयोंऽशः। स्त्रीणामंशस्तृतीयः BaudhDS. ii. 1. 51; नानावर्णस्त्रीपुत्रसमवाये दायं दशांशान् कृत्वा…विभजेरन् BaudhDS. ii. 2. 10; अप्रज्ञायमानं वित्तं…राजा…हरेत् अधिगन्त्रे षष्ठमंशं प्रदाय VādhūDS. 3. 13; VādhūDS. 3. 22; विभक्ताः (भ्रातरः) पैतृकस्य ऋणस्य…दायानुरूपमंशं (दद्युः) VādhūDS. 6. 36; समानवर्णाः पुत्राः (दायस्य) समानंशानादद्युः VādhūDS. 18. 36; ममैवांशो जीवलोके जीवभूतः सनातनः BhagGī. 15. 7; सहस्रेणापि दुर्मेधा न वृद्धिमधिगच्छति। चतुर्थेनाप्यथांशेन बुद्धिमान् सुखमेधते MahāBhā. xiv. 49. 17; मित्रावरुणयोरंशे मनुराहुतिमाजुहोत् HariVaṁ 9. 4; मित्रावरुणयोरंशे जातास्मि HariVaṁ. 9. 7; योंऽशस्तस्य (i. e. वायोः) शरीरसन्धीनाविशति तेनास्य जृम्भाङ्गमर्दौ ज्वरश्चोपजायते CaraS. ii. 6. 5 (1922); या सा पूर्वं मया प्रोक्ता कोटिकोटितमी कला। तस्याः कोटितमेनाहमंशेन विसृजे जगत् LakṣmīT. 4. 35; संयुगे…तं प्रसहेत कः। अंशादृते निषिक्तस्य नीललोहितरेतसः KumāSaṁ. 2. 57; पार्श्वयोः पृष्ठतो नाभौ जठरे हृदयांसयोः। ककुद्यंशे च हृत्पूर्वं पाणिपादयुगे ततः। जठराननयोर्न्यस्येन्मातृकार्णान् यथाक्रमम् MahNirvāT. 5. 117 (comm. ककुद्रूपेंऽशे); तदंशस्याप्यंशे तदवयवलेशेऽपि पतयो विषादे कर्तव्ये विदधति जडाः प्रत्युत मुदम् ŚatTrayī 164 = Subhāṣi. 533; माधवस्य पदार्धम्…आमदेवस्य पदचतुर्थान्सः (°र्थांशः)…केशवस्य पदचतुर्थान्सः (°र्थांशः) EI. iv. 161. 45; अंशे संख्यायास्तयट् CāndraVyā. iv. 2. 46; iii. 3. 104; vi. 1. 22; अंशो नानाव्यपदेशात् BrahmSū. ii. 3. 43; अंशा धातुषु संश्रिताः AṣṭāHṛ. i. 11. 34; न स कश्चित् पृथिव्यादेरंशो यत्र न जन्तवः। संस्वेदजाद्या जायन्ते PramāVā. 2. 37; वाचालं नूपुरं नो जगदजनि जयं शंसदंशेन पार्ष्णेर्मुष्णन्न्यासून् सुरारेः समरभुवि यया पार्वती पातु सा वः CaṇḍiŚ. 13; ज्योत्स्नांशाकर्षपाण्डुद्युति SūryŚ. 26; ननु बीजाङ्कुरादीनां कार्यकारणतेष्यते। नियता तत्र सूक्ष्मोऽपि नांशोऽस्त्यनुगमात्मकः TattvSaṁ. 506; तत्र दिग्भागभेदेन षडंशाः परमाणवः। नो चेत् पिण्डोऽणुमात्रः स्यात् NyāyVi. 2. 86: विभक्तस्य स्थूलोंऽशस्तत् पुरीषं भवति ChāndoUBh. 363. 8 (*on* vi. 5. 1); परस्यैव तावदात्मनोंऽशः जीवः अग्नेरिव विस्फुलिङ्गः BrahmSūBh.(Śaṅ.) 567. 15 (*on* iii. 2. 5); तेजसः अंशः एकदेशः संभवः यस्य तत् तेजोंऽशसंभवमिति अवगच्छ GītāBh. (Śaṅ.) 297. 17 (*on* 10. 41); आवर्तयेत् तमंशं तत्रान्यत्रापि वा भूयः Kāvyālaṅ. (Ru.) 3. 20 (comm. आवर्तयेद् यमकयेत् तमंशं विभक्तं भागम्। …अन्यत्र वाप्यंशान्तरैर्भूयः प्रभूतमावर्तयेत्); राज्ञा तस्मै स्वराज्यस्य दशमोंऽशः प्रकल्पितः BṛKathāŚloSaṁ. 23. 108; जल्प यद्यल्पकोऽप्यंशः क्षितेः स्वस्थोऽवशिष्यते Kapphiṇā. 16. 75; नांशः परस्य न च तस्य विकार एषः SaṁkṣeŚā. 3. 10; कल्पिताश्चेदंशाः स्युः IṣṭaSi. 2. 3; तस्य एकोंऽशस्तिष्ठति IṣṭaSi. 88. 7; एष ह्यशेषसत्त्वानामात्मांशः परमात्मनः BhāgP. iii. 6. 8; एकस्यैव ममांशस्य जीवस्यैव महामते। बन्धोऽस्याविद्ययानादिर्विद्यया च तथेतरः BhāgP. xi. 11. 4; न चांशवान् (प्रत्यगात्मा) येन कश्चिदस्यांशो गृह्येत कश्चिन्न गृह्येत Bhām. 21. 17 (*on* i. 1. 1); सांवृतस्य प्रवाहस्य अंशः प्रत्ययः …। तस्य प्रत्ययस्यैकाग्रता…धर्मः TattvVai. 37. 17 (*on* 1. 32); राजधान्यां नृपावासो ब्रह्मांशादपरांशके। तस्य प्राच्यां तु बाह्यालिरिन्द्रकोशसभान्वितः VāstuVi. 40. 25; अंशभागैर्भवद्भिस्तु रक्ष्योऽयं नाट्यमण्डपः NāṭyaŚā. 1. 83; अंशैर्यानि भाजनानि अधिष्ठानानि तैः। मण्डपस्यांशेषु वः भवतां ये तृतीयचतुर्थादयो भागाः तैः। अंशविभागमेवाह रक्षण इति AbhinBhā. i. 31. 11 (*on* 1. 83); अनादरश्च (परप्रत्यक्षस्य) सहस्रतमेऽप्यंशे परप्रत्ययस्यादृष्टमूलस्य न्यायाभासनिमित्तत्वसंभवाद् भ्रान्त्यादिमूलसंभवाद्वा … न त्वप्रामाण्याध्यवसानम् ŚāstrDī. 26. 13 (*on* i. 3. 3); (शिष्याय) पञ्चगव्यं चरोरंशं दन्तकाष्ठं च दापयेत् ĪśānŚiPa. ii. 18. 27; सहते नरपतिकोपं त्यजति किराटो न रूपकस्यांशम् KalāVi. 2.35; अहो प्रव्राजकोऽसि त्वं धर्मस्यांशं न वेत्स्यसि KathāSaSāg. vi. 7. 34; तौ पुनस्तत एवांशं दत्त्वा प्रेर्य च घातकान्। तस्याच्छेदयतां पाणिपादम् KathāSaSāg. vi. 7. 48; असंख्येयः परस्यांशः पुंसः कर्ता च पूरुषः NītiMā. 46. 7; तदेवं परमात्मनोंऽशः प्रत्यगात्मा NītiMā. 52. 8; समेंऽशेऽर्धं न वा SiddhaHe. iii. 1. 54; अद्यापि न्यासदीन्नाराः सन्ति चेत् तत्प्रदर्श्यताम्। अंशः कियानपि ततस्ततो वच्मि यथोचितम् RājTa. (Ka.) 8. 151; अंशोऽपि नास्ति निर्दोषः RājTa. (Ka.) 1. 13; सद्भिस्तदप्युपकृतादपि कश्चिदंशः स्वीकार्य एव PṛthvīVi. 4. 62; चित्तादिवांशावुभौ लेभेऽसौ मलयेश्वरस्य तनया PṛthvīVi. 11. 37; पितृमेधः पत्नीनां स्वैः स्वैरौपासनस्याग्नेरंशैः SmṛtiCan. ii. 444. 15; न चोपाधिकृतोंऽशः स एव BrahmSūBh. (Ma.) 27A. 1 (*on* ii. 1.27); अंशो ह्येष परस्य योऽयं पुमानुत्पद्यते च म्रियते च BrahmSūBh. (Ma.) 38A. 7 (*on* ii. 3.43); अंशस्तु द्विविधो ज्ञेयः AnuVyā. 37A. 2 (*on* 2. 3); अंशाभ्यां तदा-(i. e. सदसदा-)त्मकत्वे न भ्रान्तिबाधव्यवस्था आस्थापदं प्राञ्चति पूर्वोत्तरयोरेकैकांशे यथार्थत्वात् PrakaVi. 9. 12; तन्त्ववयवे अंशः अङ्गीक्रियते TarkSaṁ. (Ā.) 75. 9; शब्दैस्तन्त्रंशरूपप्रभृतिभिरखिलः स्थाप्यते विश्वमूर्तेरित्थम्भावः TattvMu. 4. 84; वित्तं यदर्जयिष्येंऽशं चतुर्थं तस्य धारयन्। यावज्जीवमहं शेषं प्रदास्ये धर्मकर्मणि PārśvC. 2. 991; दीपोत्सवः पुत्रजन्मोत्सवस्यांशो न षोडशः ŚāliC. 2. 64; बहुषु च वपुषोंऽशेषु निर्वाह एषः TattvMu. 2. 19; न्यासविद्या तु प्रारब्धमपि निःशेषं विनाशयितुं शक्ता, तथापि रागविषयमंशं तदनुबन्धि दुःखं च स्थापयति NyāySiA. 220. 1; सतो नावयवाः शङ्क्यास्तदंशस्यानिरूपणात्। नामरूपे न तस्यांशौ तयोरद्याप्यनुद्भवात् PañcDa. 2. 22; अंशैः सामर्क्षुं कृत्स्नं वा प्रत्यृचं तिसृभिः श्रुतेः। अंशैर्भेवं स्तुरे(? ते)रंशैरसिद्धैः प्रत्यृचं भवेत् NyāyMāVi. 437. 12 (*on* ix. 2. 3); (अहं) जातस्तेंऽशो जीवदृष्ट्या त्रिदृष्टे ŚaṅkaDigVi. (Mā.) 6. 41; ननु वयं जीवान् ब्रह्मणोंऽशानभ्युपगच्छामः Vādā. 150. 8; तेषां चांशानां प्रत्येकं चेतनत्वेन विरुद्धादिक्रियं शरीरमुन्मथ्येताक्रियं वापद्येत TattvPrakā. 116A. 2 (*on* ii. 3. 20); 117B. 7 (*on* ii. 3. 26); (जीवः) किमीश्वरांशो न वेति सन्देहः।… तत्र न जीवो हरेरंशः नाप्यनंश इति निर्णयो युज्यत इति पूर्वः पक्षः TattvPrakā. 122A. 11 (*on* ii. 3. 43); मुद्गमाषादयो हि यद्यपि तुषान्तरावस्थितेनैवांशेनाङ्कुरोपादानं तथापि न तुषविकलानामंशानामङ्कुरजनकतास्ति NyāySu. (Ja.) 201B. 8 (*on* i. 4. 6); 463B. 5 (*on* iii. 2. 1); जीवास्तु ब्रह्मणोंऽशाश्चित्स्वभावा वह्नेरिव विस्फुलिङ्गा अत एव ब्रह्मणो भिन्नाभिन्नाः। परस्परमीश्वराच्च भिन्ना एव NyāySu. (Ja.) 504A. 1 (*on* iii. 2. 9); श्रुतिसहस्रैर्निःसंदिग्धैर्ब्रह्मणः स्वरूपं कार्यमंशाश्च प्रतिपादिताः AṇuBh. 114. 17 (*on* i. 4. 19); जीवो नाम ब्रह्मणोंऽशः AṇuBh. 154. 17 (*on* ii. 3. 43); परमात्मनो जीवोंऽशः…भेदव्यपदेशात्…अभेदव्यपदेशाच्च VedāntPāSau. 235. 16 (*on* ii. 3. 42); न चायमौपाधिकोंऽशः। न चेदुपाधीतिन्यायेन स्वाभाविकांशाभावे तदयोगात् Nyāyāmṛ. 498B. 9; गुणिना क्रियावत्या व्यक्त्या केवलरूपेण अवयवेन अंशेन। भिन्नाभिन्नं भेदाभेदोभयवत् LaCandr. 59. 7; शक्ताः किं शततममंशमत्र दातुम् ŚivLī. 6. 37; नृपेण नीतः कियानंश इवाभ्रसिन्धोः Gaṅgāva. 8. 84; तथापि तद्गुणगणस्यांशं लभन्ते न ते PadyāTa. 258; यस्याहुरागमविदः…अंशे कियत्यपि निविष्टममुं प्रपञ्चम् ŚivārkaMaDī. i. 1. 4 (*on* i. 1. 0); तेनातिथ्यायामस्यांशस्य लोपः BhāṭṭCan. 117. 21 (*on* iv. 3. 10); जीवात्मा परमेश्वरस्यांशो मूर्त्येकदेश एव BrahmSūBh. (Śrī.) ii. 158. 10. (*on* ii. 3. 42); उपाध्यवच्छिन्नस्यानन्यभूतस्य वाचकोऽयमंशशब्दः BrahmSūBh. (Bhā.) 140. 27 (*on* ii. 3. 43); किमीश एव मायया परिच्छिन्नो जीवः किंवा…तस्यांश इति GoviBh. 163. 15 (*on* ii. 3. 41); (खद्योतनिकराः) सहस्रांशोरंशा इव चरमशैलव्यतिकराद्विशीर्णाः पर्यस्ताः पथिकपृथुनिःश्वासपवनैः KaṁVa. 3. 18 = PadyaVe. 631; कावेरिपाककुल्यांशप्राप्तजीवनवर्धितम्। ग्रा[म]म् नीपतटाकाख्यं कांक्षणीयगुणान्वितम् EI viii. 311. 50; **4B ii** the outer corner of the eye प्रसन्ना स्निग्धशुक्लांशान्तर्बहिर्गामितारका। ईषत्कुञ्चितपक्ष्माग्राद्भुता (comm. स्निग्धः मसृणः शुक्लः शुभ्रः अंशः अपाङ्गो यस्याः सा) SaṁgīRa. iv. 7. 392; **4 B iii** name given to a division of some works इत्येष तेंऽशः प्रथमः पुराणस्यास्य वै द्विज। यथावत् कथितः ViṣṇuP. i. 22.88; इति च षष्ठेंऽशे शुभाश्रयप्रकरणे सुव्यक्तमुक्तम् VedāSaṁ. 144. 5; श्रीविष्णुपुराणे षष्ठेंऽशे पराशरवचः MāṭhVṛ. 37. 16 (*on* 22); इति…योगसारसंग्रहे…प्रथमोंऽशः YogSā. 21. 15; LalitāSaBh. 5. 26 (6); 140. 29 (182); **4 B iv** part in general as associated with the whole (*aṁśa-aṁśin*) नांशेष्वंशी न. तेऽत्रान्ये…NyāyVi. 2.110; अंशः अंशिना एकत्वप्रत्ययार्हः BṛĀraUBh. 258. 16 (*on* ii. 1. 20); ननु नांशः अंशिनोऽर्थान्तरम्, नापि स एव, उभयथानंशत्वात् BrahmSi. 66.22; अंशांशिनोश्च भिन्नाभिन्नत्वं प्रसिद्धम् IṣṭaSi. 242.7; अंशा अप्यंशयपेक्षयोपसर्गा भवन्ति KarmaNi. 4B. 4; अंशिनो हि पटाद्या ये भिन्नैरेव परस्परम्। अंशैरंशिन उच्यन्ते नैवमेव हि चेतनाः॥ अतोऽनंशिन इत्येव श्रुति-